श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ पञ्चसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चसप्ततितमः सर्गः ॥

## लङ्काया दहनं रक्षसां वानराणां च घोरं युद्धम्

ततोऽब्रवीन्महातेजाः सुग्रीवो वानरेश्वरः।
अर्थ्यं विज्ञापयंश्चापि हनूमन्तमिदं वचः ॥ **6.75.1** ॥

यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः।
नेदानीमुपनिर्हारं रावणो दातुमर्हति ॥ **6.75.2** ॥

ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः।
लङ्कामभिपतन्त्वाशु गृह्योल्काः प्लवगर्षभाः ॥ **6.75.3** ॥

ततोऽस्तं गत आदित्ये रौद्रे तस्मिन् निशामुखे।
लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥ **6.75.4** ॥

उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः।
आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥ **6.75.5** ॥

गोपुराट्टप्रतोलीषु चर्यासु विविधासु च।
प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम् ॥ **6.75.6** ॥

तेषां गृहसहस्राणि ददाह हुतभुक् तदा।
प्रासादाः पर्वताकाराः पतन्ति धरणीतले ॥ **6.75.7** ॥

अगुरुर्दह्यते तत्र परं चैव सुचन्दनम्।
मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकम्॥ **6.75.8**॥

क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम्।
आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम्॥ **6.75.9**॥

नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदम्।
गजग्रैवेयकक्ष्याश्च रथभाण्डांश्च संस्कृतान्॥ **6.75.10**॥

तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च।
खड्गा धनूंषि ज्याबाणास्तोमराङ्कुशशक्तयः॥ **6.75.11**॥

रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु।
मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः॥ **6.75.12**॥

विविधानस्त्रसङ्घातानग्निर्दहति तत्र वै।
नानाविधान् गृहांश्चित्रान् ददाह हुतभुक् तदा॥ **6.75.13**॥

आवासान् राक्षसानां च सर्वेषां गृहगृध्नुनाम्।
हेमचित्रतनुत्राणां स्रग्भाण्डाम्बरधारिणाम्॥ **6.75.14**॥

सीधुपानचलाक्षाणां मदविह्वलगामिनाम्।
कान्तालम्बितवस्त्राणां शत्रुसञ्जातमन्युनाम्॥ **6.75.15**॥

गदाशूलासिहस्तानां खादतां पिबतामपि।
शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह॥ **6.75.16**॥

त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः।
तेषां शतसहस्राणि तदा लङ्कानिवासिनाम्॥ **6.75.17**॥

अदहत् पावकस्तत्र जज्वाल च पुनः पुनः।
सारवन्ति महार्हाणि गम्भीरगुणवन्ति च॥ **6.75.18**॥

हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च।
तत्र चित्रगवाक्षाणि साधिष्ठानानि सर्वशः ॥ **6.75.19** ॥

मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम्।
क्रौञ्चबर्हिणवीणानां भूषणानां च निःस्वनैः ॥ **6.75.20** ॥

नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः।
ज्वलनेन परीतानि तोरणानि चकाशिरे ॥ **6.75.21** ॥

विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे।
ज्वलनेन परीतानि गृहाणि प्रचकाशिरे ॥ **6.75.22** ॥

दावाग्निदीप्तानि यथा शिखराणि महागिरेः।
विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः ॥ **6.75.23** ॥

त्यक्ताभरणसंयोगा हाहेत्युच्चैर्विचुक्रुशुः।
तत्र चाग्निपरीतानि निपेतुर्भवनान्यपि ॥ **6.75.24** ॥

वज्रिवज्रहतानीव शिखराणि महागिरेः।
तानि निर्दह्यमानानि दूरतः प्रचकाशिरे ॥ **6.75.25** ॥

हिमवच्छिखराणीव दह्यमानानि सर्वशः।
हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि ॥ **6.75.26** ॥

रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः।
हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि।
बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ **6.75.27** ॥

अश्वं मुक्तं गजो दृष्ट्वा क्वचिद् भीतोऽपसर्पति।
भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते ॥ **6.75.28** ॥

लङ्कायां दह्यमानायां शुशुभे च महोदधिः।
छायासंसक्तसलिलो लोहितोद इवार्णवः॥ **6.75.29** ॥

सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी।
लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा॥ **6.75.30** ॥

नारीजनस्य धूमेन व्याप्तस्योचैर्विनेदुषः।
स्वनो ज्वलनतप्तस्य शुश्रुवे शतयोजनम्॥ **6.75.31** ॥

प्रदग्धकायानपरान् राक्षसान् निर्गतान् बहिः।
सहसा ह्युत्पतन्ति स्म हरयोऽथ युयुत्सवः॥ **6.75.32** ॥

उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम्।
दिशो दश समुद्रं च पृथिवीं च व्यनादयत्॥ **6.75.33** ॥

विशल्यौ च महात्मानौ तावुभौ रामलक्ष्मणौ।
असम्भ्रान्तौ जगृहतुस्ते उभे धनुषी वरे॥ **6.75.34** ॥

ततो विस्फारयामास रामश्च धनुरुत्तमम्।
बभूव तुमुलः शब्दो राक्षसानां भयावहः॥ **6.75.35** ॥

अशोभत तदा रामो धनुर्विस्फारयन् महत्।
भगवानिव सङ्क्रुद्धो भवो वेदमयं धनुः॥ **6.75.36** ॥

उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम्।
ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे॥ **6.75.37** ॥

वानरोद्घुष्टघोषश्च राक्षसानां च निःस्वनः।
ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश॥ **6.75.38** ॥

तस्य कार्मुकनिर्मुक्तैः शरैस्तत्पुरगोपुरम्।
कैलासशृङ्गप्रतिमं विकीर्णमभवद् भुवि॥ **6.75.39** ॥

ततो रामशरान् दृष्ट्वा विमानेषु गृहेषु च।
सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत॥ **6.75.40** ॥

तेषां सन्नह्यमानानां सिंहनादं च कुर्वताम्।
शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत॥ **6.75.41** ॥

आदिष्टा वानरेन्द्रास्ते सुग्रीवेण महात्मना।
आसन्नं द्वारमासाद्य युध्यध्वं च प्लवङ्गमाः॥ **6.75.42** ॥

यश्च वो वितथं कुर्यात् तत्र तत्राप्युपस्थितः।
स हन्तव्योऽभिसम्प्लुत्य राजशासनदूषकः॥ **6.75.43** ॥

तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु।
स्थितेषु द्वारमाश्रित्य रावणं क्रोध आविशत्॥ **6.75.44** ॥

तस्य जृम्भितविक्षेपाद् व्यामिश्रा वै दिशो दश।
रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत॥ **6.75.45** ॥

स कुम्भं च निकुम्भं च कुम्भकर्णात्मजावुभौ।
प्रेषयामास सङ्क्रुद्धो राक्षसैर्बहुभिः सह॥ **6.75.46** ॥

यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा।
निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात्॥ **6.75.47** ॥

शशास चैव तान् सर्वान् राक्षसान् स महाबलान्।
राक्षसा गच्छताद्यैव सिंहनादं च नादयन्॥ **6.75.48** ॥

ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः।
लङ्काया निर्ययुर्वीराः प्रणदन्तः पुनः पुनः॥ **6.75.49** ॥

रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च सर्वशः।
चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह॥ **6.75.50** ॥

तत्र ताराधिपस्याभा ताराणां भा तथैव च।
तयोराभरणाभा च ज्वलिता द्यामभासयत्॥ **6.75.51** ॥

चन्द्राभा भूषणाभा च ग्रहाणां ज्वलतां च भा।
हरिराक्षससैन्यानि भ्राजयामास सर्वतः॥ **6.75.52** ॥

तत्र चार्धप्रदीप्तानां गृहाणां सागरः पुनः।
भाभिः संसक्तसलिलश्चलोर्मिः शुशुभेऽधिकम्॥ **6.75.53** ॥

पताकाध्वजसंयुक्तमुत्तमासिपरश्वधम्।
भीमाश्वरथमातङ्गं नानापत्तिसमाकुलम्॥ **6.75.54** ॥

दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम्।
तद् राक्षसबलं भीमं घोरविक्रमपौरुषम्॥ **6.75.55** ॥

ददृशे ज्वलितप्रासं किङ्किणीशतनादितम्।
हेमजालाचितभुजं व्यावेष्टितपरश्वधम्॥ **6.75.56** ॥

व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम्।
गन्धमाल्यमधूत्सेकसम्मोदितमहानिलम्॥ **6.75.57** ॥

घोरं शूरजनाकीर्णं महाम्बुधरनिःस्वनम्।
तद् दृष्ट्वा बलमायातं राक्षसानां दुरासदम्॥ **6.75.58** ॥

सञ्चचाल प्लवङ्गानां बलमुच्चैर्ननाद च।
जवेनाप्लुत्य च पुनस्तद् बलं रक्षसां महत्॥ **6.75.59** ॥

अभ्ययात् प्रत्यरिबलं पतङ्गा इव पावकम्।
तेषां भुजपरामर्शव्यामृष्टपरिघाशनि॥ **6.75.60** ॥

राक्षसानां बलं श्रेष्ठं भूयः परमशोभत।
तत्रोन्मत्ता इवोत्पेतुर्हरयोऽथ युयुत्सवः॥ **6.75.61** ॥

तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान्।
तथैवापततां तेषां हरीणां निशितैः शरैः॥ **6.75.62** ॥

शिरांसि सहसा जह्रू राक्षसा भीमविक्रमाः।
दशनैर्हतकर्णाश्च मुष्टिभिर्भिन्नमस्तकाः।
शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः॥ **6.75.63** ॥

तथैवाप्यपरे तेषां कपीनामसिभिः शितैः।
प्रवरानभितो जघ्नुर्घोररूपा निशाचराः॥ **6.75.64** ॥

घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत्।
गर्हमाणं जगर्हान्यो दशन्तमपरोऽदशत्॥ **6.75.65** ॥

देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः।
किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे॥ **6.75.66** ॥

विप्रलम्भितशस्त्रं च विमुक्तकवचायुधम्।
समुद्यतमहाप्रासं मुष्टिशूलासिकुन्तलम्॥ **6.75.67** ॥

प्रावर्तत महारौद्रं युद्धं वानररक्षसाम्।
वानरान् दश सप्तेति राक्षसा जघ्नुराहवे॥ **6.75.68** ॥

राक्षसान् दश सप्तेति वानराश्चाभ्यपातयन्।
विप्रलम्भितवस्त्रं च विमुक्तकवचध्वजम्।
बलं राक्षसमालम्ब्य वानराः पर्यवारयन्॥ **6.75.69** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः॥